Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 5 | ISSN : 2582-0095

# द्वितीयव्याप्तिस्वरूपे जगदीशगदाधरयोः साम्यं वैशम्यञ्च



त्रिवेदी भगीरथः रमेशचन्द्रः
नव्यन्याय प्राध्यापकः,
दर्शनम् संस्कृतमहाविद्यालयः,
छारोडी, अमदावाद, गुजरात, भारतम्।

**Article Info**

Volume 3 Issue 5

Page Number: 62-71

Publication Issue :

September-October-2020

**Article History**

Accepted : 15 Oct 2020

Published : 26 Oct 2020

सारांश – **"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।।"** इति मनुस्मृत्युक्तरीत्या तर्कसहकृत एव वेदः यथावदर्थबोधनक्षम इति सर्वे संविद्रते । तस्य तर्कस्य साङ्गस्य सामान्यतः विशेषतश्च स्वरूपप्रतिपादनार्थं न्यायविस्ताराख्यं शास्त्रमवतारत् । प्रत्यक्षादि चतुर्ष्वपि प्रमाणेषु अनुमानप्रमाणस्यैव प्राधान्यत्वेन मन्यमानाः गङ्गेशोपाध्यायाः द्वितीयव्याप्तिस्वरूपमित्थं प्रतिपादयन्ति यत् -**' साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्'** ।
अव्याप्यवृत्तिसाध्यकसद्हेतावव्याप्तिमाशङ्क्य **साध्यवद्भेन्ने'ति** शेषणमुपात्तम् ।

- **जगदीशगदाधरयोः साम्यम् ।**
  - अधिकरणभेदेनाभावो भिद्यत इतीमं न्यायमभिमुखीकृत्यैव द्वितीयलक्षणारम्भः कृतः ।
  - साध्यवद्भिन्नसाध्याभाववदवृत्तित्वात्मक द्वितीयलक्षणे समासस्वीकारपक्षे कर्मधारयसमासमनाधृत्य सप्तमीतत्पुरुषसमासाङ्गीकारे एव लक्षणसार्थकता ।
  - व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोः विरुद्धधर्मयोः एकस्मिन्नेवाधिकरणे वृत्तित्वाभावः उपपादितः ।
  - साध्यपदप्रयोजनकाले साध्यवद्भिन्नवृत्तिः यः गगनाभावः तद्वति पर्वतादौ धर्मस्य विद्यमानत्वात् अव्याप्तिः अतः साध्यपदमुपात्तम् ।
  - गुणवृत्यभाव-गगनाभावयोः भेदेपि न दोषः ।
  - साध्यतावच्छेदकधर्मसम्बन्धावच्छिन्न स्वीकारात् **'वह्नमान् धूमात्'** इत्यादि स्थले नाव्याप्त्यादिदोषप्रसक्तिः ।
- **जगदीशगदाधरयोः वैशम्यम् ।**
  - गदाधरभट्टाचार्येण- साध्यवत्ताग्रहविरोधितानियामकसम्बन्धादिना ' घटः पटत्वाभाववान् पटत्वात् ' इत्यादिस्थलेषु प्रकारान्तरेण अव्याप्तेः परिहारो कृतः, अनेके सूक्ष्मविचाराश्च दर्शिताः । तर्कालङ्कारेण तु एतादृशसम्धान् अस्पृश्यैव अव्याप्तिमाङ्क्य विविधाः विचाराः कृताः ।
  - गदाधरेण-'अन्यतराभावः अन्यतरस्वरूपः' इति न्यायस्य स्वीकारो न कृतः । जगदीशपक्षे तु साक्षात् अव्याप्तिः प्रदर्शिता ।
  - अन्ते गदाधरेण-**'घटत्वघटत्वाकाशसंयोगान्यतराभावाभाववानाकाशत्वात्'** इत्यत्र अव्याप्तिरापादिता ।

जगदीशेन तु – **'घटत्वघटत्वाकाशासंयोगान्यतरत्वावच्छिनाभाववान् गगनात्** ' इति **आकाशत्वात्** इति स्थाने **गगनत्वात्** इति शब्दान्तरं कृतम् । उभयत्र अव्याप्यवृत्तिसाध्यकसद्हेतावेव अव्याप्तिः तादवस्थैव इत्यलं लेखन जालेन।

**मुख्य शब्द** – द्वितीय, व्याप्तिस्वरूपः, जगदीशगदाधरः, साम्यं, वैशम्यम्।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

***प्रास्ताविकम् – आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । इति ।*** इमाश्चतस्त्रोविद्याः प्राणभृतामनुग्रहाय महर्षिभिरुपदिष्टा । तत्रान्वीक्षिकी न्यायशास्त्रम्, न्यायविद्या, वाकोवाक्यम् इत्यादिशब्दैः व्यपदिश्यमाना प्राचीननवीनभेदेन विस्तारमगमत् । उदयनमाारभ्यतत्पूर्वं प्रवृत्तस्य शास्त्रस्य प्राचीनन्यायशास्त्रमिति गङ्गेशोपाध्यायमारभ्य प्रवृतस्य शास्त्रस्य नव्यन्यायशास्त्रमिति च व्यपदेशस्समभवत्।

तत्र च क्रमशः तत्वचिन्तामणिमधिकृत्य रघुनाथशिरोमणिना '**दीधिति**'नाम्नी टीका व्यलेखि । गच्छता कालेन तां टीकामाश्रित्य गदाधरभट्टाचार्येण गादाधरी–टीका, जगदीशतर्कालङ्कारेण जागदीशी–टीका रचिता ।

'[1]**प्रत्यक्षपरिकलितमप्यथमनुमानेनैव बुभुत्सन्ते तर्करसिकाः**' इति वचनानुगुणं प्रत्यक्षादि चतुर्ष्वपि प्रमाणेषु अनुमानप्रमाणस्यैव प्राधान्यत्वेन मन्यमानाः गङ्गेशोपाध्यायाः तत्वचिन्तामणौ व्याप्तिस्वरूपनिरूपणप्रसङ्गे अव्यभिचरितत्वव्याप्तेः द्वितीयस्वरूपमित्थं प्रतिपादयन्ति यत्–

**[2]साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् ।**

एत्तलक्षणव्याख्यानावसरे जगदीशतर्कालङ्कारेण स्वप्रतिभया अल्पानुमानानि स्वीकृत्य साक्षात् अव्याप्यवृत्तिसाध्यकसदनुमानस्थलादिषु दोषान् प्रादर्शयत् । तदपेक्षया गदाधरभट्टाचार्येण नानाप्रयोजनमन्वीक्ष्य विविधसम्बन्धान् उपादाय अन्ते तत्रैव अव्याप्यवृत्तिसाध्यकसदनुमानस्थले दोषान् उदपादयत् । जगदीशापेक्षया गदाधरः युवा आसीत् । अतः जगदीशस्यैव मतखण्डनं गदाधरेण कुतमस्ति । पुनश्च विद्वत्तल्लजाः जगदीशस्य ग्रन्थाः व्युत्पादकाः गदाधरस्य मोहका इत्यामनन्ति ।

- ***जगदीश–गदाधरयोः परिचितिः ।***

  - ***जगदीशतर्कालङ्कारः ।***

जगदीशतर्कालङ्कारश्चासीत् १६२५ ईसकालीनः नवद्वीपवास्तव्यो श्रीभवानन्दतर्कवागीशस्य प्रधानभूतः प्रभूतः शिष्यः । अयञ्च बाल्यकालत एव मल्लविद्यायामपि निष्णात आसीत् । '**जागदीशी–व्यधिकरण**' नामके ग्रन्थे व्याप्तिलक्षणघटकीभूतस्य प्रभूतस्य सामानाधिकरण्यपदस्य व्यावृत्तिं वदन् स्वीयगुरोः श्रीभवानन्दस्य सादरं नामोल्लेखजन्यां परमां भक्तिं प्रादर्शयत् ।

  - ***गदाधरभट्टाचार्यः ।***

गदाधरभट्टाचार्यः श्रीजीवाचार्यस्याऽऽत्मजः सन् बङ्गदेशनिवासी आसीदित्यपि श्रूयते । बङ्गदेशीयत्वेऽपि रेन्द्रकुलोत्पन्नः, पवनामण्डलान्तर्गत '**पक्ष्मीपाश**' नामकग्रामनिवासी च श्रूयते । श्रीभट्टाचार्यः हरिरामतर्कवागीशस्य सान्निध्यमवाप्य समस्तमपि न्यायशास्त्रमधीतवान् अत एव प्रकाण्डनैयायिकोऽभूत् । अस्य जनिकालं सप्तदश(१७) शताब्द्या मध्यकालं प्रस्फोरयन्ति मनीषिणः । केचन विद्वांसः १६५०ईसवीयकालीनमेनं प्रवदन्ति ।

- **अव्यभिचरितत्वपदविचारः**

अव्यभिचरितत्वं अव्यभिचारपदार्थः । स च पक्षः व्याप्तिभेदः साध्यः । तत्राव्यभिचारपदार्थे सिद्धान्तव्याप्तिभेदसाधने सिद्धसाधनम् । परन्तु अव्यभिचारपदार्थे अनुमितिज्ञानविषयत्वस्य पूर्वपक्षिणा स्वीकारात् सिद्धान्तिना चास्वीकारन्नसिद्धसाधनमितिभावः । तथा चाव्यभिचारपदार्थः पक्षः, अनुमितिजनकज्ञानविषयभेदः साध्यः ।

---

[1] पक्षता(तत्वचिन्तामणिग्रन्थः)

[2] व्याप्तिग्रन्थः(तत्वचिन्तामणिग्रन्थः)

व्यभिचारस्तु साध्याभाववत्वृत्तित्वम् । साध्याभाववति ह्रदे प्रमेयत्वस्यसत्वात् व्यभिचारः । व्यभिचारस्याभाव अव्यभिचारः । यत्र साध्याभाववति हेतो अवृत्तित्वं भवेत् । वह्निमान् धूमात् इत्यादिस्थलेषु वह्न्यभाववति ह्रदे हेतोः धूमस्य अविद्यमानत्वात् नाव्याप्त्यादिदोषप्रसक्तिः । तेन च अव्यभिचारपदार्थो स्पष्टः ।

❖ **द्वितीयलक्षणावतरणे बीजम् ।**

साध्याभाववदवृत्तित्वमिति प्रथमलक्षणस्य **''वह्निमान् धूमात्''** इत्यादि स्थलेषु अव्याप्त्यादिदोषनिराकरणेऽपि अव्याप्यवृत्तिसाध्यक सद्हेतौ अव्याप्तिमाशङ्कते ।

अव्याप्तिवृत्तिसाध्यकसद्हेतुस्थलमस्ति, **''कपिसंयोगी एतद्वृक्षत्वात्''** इति । हेत्वधिकरणे एतद्वृक्षत्वाधिकरणे वृक्षे कपिसंयोगस्य विद्यमानत्वादयं सद्हेतुस्थलम् । तथा हि – प्रकृते साध्यः कपिसंयोगः साध्याभावः कपिसंयोगाभावः तद्वान् साध्याभाववान् वृक्षोऽपि । वृक्षे अग्रावच्छेदेन कपिसंयोगसत्वेऽपि मूलावच्छेदेन कपिसंयोगाभावस्य वर्तमानत्वात् । प्रतियोगिनः कपिसंयोगस्याधिकरणे वृक्षे प्रतियोग्यनधिकरणमूलदेशावच्छेदेन कपिसंयोगाभावस्य **''अग्रे वृक्षः कपिसंयोगी न मूले''** इति प्रतीतिबलेन स्वीकारात् । तथा च **''उत्पन्नं द्रव्यं क्षणमगुणमक्रियं च तिष्ठति''** इति न्यायात् वृक्ष एव उत्पत्तिकालावच्छेदेन कपिसंयोगाभावो वर्तते । तथा च कपिसंयोगरूपप्रतियोगिनः अनधिकरणौ यौ देशकालौ मूलम् उत्पत्तिकालश्च तदवच्छेदेन कपिसंयोगाभाववान् वृक्षः तदवृत्तित्वम् एतद्वृक्षत्वस्य नास्तीत्यव्याप्तिः ।

अतः द्वितीयलक्षणमारब्धम् । **साध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपम्** । तदनुगुणं न कपिसंयोगी एतद्वृक्षत्वादि अव्याप्यवृत्तिसाध्यकसद्हेतुस्थलेषु अव्याप्तिः ।

द्वितीयलक्षणावतरणे किं बीजम् ? इत्यत्र तु **'अव्याप्यवृत्तिसाध्यकसद्हेतावव्याप्तिमाशङ्क्याह-साध्यनद्भिन्नेति'** दीधितिवचनमेव स्वीकृत्य व्याख्यानं कृतं जगदीशेन गदाधरेण च ।

❖ **द्वितीयलक्षणे समन्वयप्रदर्शनम् ।**

लक्षणस्यास्य **'पर्वतो वह्निमान् धूमात्'** इत्यत्र समन्वयः । तथाहि – पक्षः पर्वतः साध्यः वह्निः हेतुः धूमः – यत्र यत्र धूमः तत्र तत्र वह्निः यथा – महानसादिः इति व्याप्तेः सत्वादयं सद्हेतुः । प्रकृते साध्यः वह्निः साध्यवान् वह्निमान् पर्वतमहानसादिः, तद्भिन्नः जलह्रदादिः तद्वृत्तिः यः साध्याभावः साध्यनिष्ठप्रतियोगिताकः अभावः इत्युक्ते वह्निर्नास्तीति प्रतीतिसाक्षिकः वह्न्यभावः, तदधिकरणं जलह्रदादिः तद्वृत्तित्वं मीनशैवालादौ, अवृत्तित्वमधूमे'ति लक्षण समन्वयः ।

**''धूमवान् वह्नेः''** इति व्यभिचारिणि लक्षणासमन्वयात् नातिव्याप्तिः । तथाहि –साध्यः धूमः हेतुः वह्निः, यत्र वह्निः तत्र धूमः इति व्याप्तेः अयोगोलके असमन्वयात् अयमसद्हेतुः । प्रकृते साध्यः धूमः साध्यवान् धूमवान् पर्वतमहानसादिः तद्भिन्नः **यथा जलह्रदादिः तथा तप्तायःपिण्डमपि** तद्वृत्तिः यः साध्याभावः इत्युक्ते धूमो नास्तीति प्रतीतिसिद्धः धूमाभावः तदधिकरणं अयोगोलकमपि तत्र हेतोः वह्नेः वृत्तित्वात् नातिव्याप्तिः ।

साध्याभाववदवृत्तित्वरूपव्याप्तेः प्रथमलक्षणस्य **'कपिसंयोगी एतद्वृक्षत्वात्'** इति अव्याप्यवृत्तिसाध्यकसद्हेतौ अव्याप्तित्वात् **'साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्'** इति द्वितीयलक्षणम् आरब्धम्, तथा च नाव्याप्त्यादिदोषप्रसक्तिः ।

तथाहि – साध्यः कपिसंयोगः हेतुः एतद्वृक्षत्वं यत्र यत्र एतद्वृक्षत्वं तत्र तत्र कपिसंयोगः यथा – पुरोवर्तिवृक्षः इति व्याप्तेः सत्वादयं सद्हेतुः । प्रकृते साध्यः कपिसंयोगः साध्यवान् कपिसंयोगवान् वृक्षः तद्भिन्नः गुणादिः तत्र वर्तमानः साध्याभावः इत्युक्ते कपिसंयोगो नास्तीति प्रतीतिसिद्धः कपिसंयोगाभावः तदधिकरणं गुणादि एव न तु वृक्षः तद्वृत्तित्वं गुणत्वे अवृत्तित्वं हेतौ एतद्वृक्षत्वेऽस्तीति लक्षण समन्वयः ।

अधिकरणभेदेन अभावस्य भिन्नतया गुणादिवृत्तिकपिसंयोगाभाववृक्ष-वृत्तिकपिसंयोगाभावयोर्भेदात् नाव्याप्त्यादिदोषप्रसक्तिरितिभावः । वृक्षवृत्तिकपिसंयोगाभावः अव्याप्यवृत्तिकपिसंयोगाभाव एवं गुणादिवृत्तिकपिसंयोगाभावव्याप्यवृत्तिकपिसंयोगाभावः । तथा च साध्यवद्भिन्नगुणादिवृत्तिकपिसंयोगाभाववान् गुणादिरेव न तु वृक्षः तदवृत्तित्वमेव एतद्वृक्षत्वेति लक्षणसमन्वयः ।

❖ **सप्तमीतत्पुरुषसमास स्वीकारः -**

साध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपद्वितीयलक्षणस्य साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति कर्मधारयसमासम्, साध्यवद्भिन्ने यः साध्याभावः इति तत्पुरुषसमासं वा स्वीकृत्यार्थवर्णनं शक्यम् । तयोश्च दीधितिकारैः सप्तमीतत्पुरुषसमास एव स्वीकृतः।

कर्मधारय समासानङ्गीकृतः इत्यत्र कारणं प्रदर्शयति - कर्मधारय पक्षे - '**नीलघटः**' इति वाक्यात् अभेदसम्बन्धेन '**नीलविशिष्टो घटः**' इति शाब्दबोध इव 'साध्यवद्भिन्नसाध्याभाववान्' इति वाक्यात् अभेदसम्बन्धेन साध्यवद्भिन्नविशिष्टः साध्याभाववान् इति बोधो जायेत । तत्र साध्याभावांशं त्यक्त्वा मतुबर्थ सम्बन्धिनं परं निवेश्य अभेदसम्बन्धेन साध्यवद्भिन्नविशिष्टो (साध्यवद्भिन्नाभिन्नो यः सम्बन्धी) (धर्मी) तदवृत्तित्वं व्याप्तिरिवेव निर्दुष्टं लक्षणं कर्तुं शक्यते ।

'**वह्निमान् धूमात्**' इत्यत्र वह्निमद्भिन्नाभिन्नः धर्मी ह्रदः तदवृत्तित्वमेव धूमे'ति लक्षणसमन्वयो भवति । एवमेव '**कपिसंयोगी एतद्वृक्षत्वात्**' इत्यत्र कपिसंयोगवद्भिन्नाभिन्नः धर्मीगुणः तदवृत्तित्यस्य एतद्वृक्षत्व सत्वेनलक्षणसंगमनात् । अतः कर्मधारय पक्षे कर्मधारयसमास स्वीकारपक्षे साध्याभावपदं व्यर्थं स्यादिति तत्सार्थक्यसम्पादनाय दीधितिकारैः सप्तमी तत्पुरुषमाश्रित्य व्याख्यानं कृतमिति ।

अभेदसम्बन्धेन साध्यवद्भिन्नविशिष्टो यो मतुबर्थः सम्बन्धी तदवृत्तित्वादेः । आदिपदेन मतुबर्थमपि परित्यज्य तदघटितस्य साध्यवद्भिन्नावृत्तित्वस्य परिग्रहः । सप्तम्यर्थे आधेयत्वे निरूपितत्वसम्बन्धेन विशेषणतया तथा च साध्यवद्भिन्ननिरूपिताधेयतावान् (साध्यवद्भिन्नवृत्तिः) यः साध्याभावः तद्वद्वृत्तित्वं व्याप्तिरित्यर्थः । यद्वा साध्यवद्भिन्नपदं साध्यवद्भिन्ननिरूपिताधेयतावति लाक्षणिकम् । तस्याभेदसम्बन्धेन साध्याभावेऽन्वयः ।

तथा च आदिपदग्राह्ये साध्याभावे साध्यवद्भिन्नपदलक्ष्यार्थस्य साध्यवद्भिन्नवृत्तेः अभेदसम्बन्धेन विशेषणत्वमित्यर्थः ।

नन्वत्र कथं साध्याभावपदसार्थक्यमिति चेत् इत्थम् - यदि हि साध्यवद्भिन्नपदार्थस्य मतुबर्थे सम्बन्धिनि अभेद सम्बन्धेनान्वयो विवक्षितः स्यात्, तदा साध्याभाव पदं मास्तु मतुबर्थमात्रस्य लक्षणे घटनं क्रियतामिति शङ्क्येत । साध्याभावे एव साध्यवद्भिन्नपदार्थस्य साध्यवद्भिन्नवृत्तेरभेदेनान्वयस्य विवक्षिततया तस्य चान्वयस्य साध्याभावपदाभावे अलाभात् तत्पदमावश्यकमिति भावः ।

**जगदीशस्तु** — साध्यवद्भिन्नो यः साध्याभाववान् इत्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात् । न चावृत्तित्वेन समं साध्यवद्भिन्नस्य अन्वयाविवक्षणात् साध्याभाववता सममेव तादात्म्येनैव अन्वयविवक्षणात् न वैयर्थ्यमिति वाच्यम्, तथा सति साध्यवद्भिन्नात्मको यो मतुबर्थः सम्बन्धी तदवृत्तित्वस्यैव सम्यक्त्वे साध्याभावपदवैयर्थ्यध्रौव्यात्, अतः सप्तमीसमासस्वीकारः ।

तथा च साध्यवद्भिन्नश्चासौ साध्याभाववांश्च इति कर्मधारयसमासमाश्रित्य साध्यवद्भिन्नपदस्य अभेदेन साध्याभाववति अन्वयमुपपाद्य तदवृत्तित्वमिति लक्षणे कृते सति साध्याभाववत्पदवैयर्थ्यम् - यतो हि — साध्यवद्भिन्न एवं साध्याभाववान् इत्यनयोः समानार्थकत्वात् कस्यापि विशेषस्यासत्वात् च । द्विवारं एकार्थकस्यैव पदस्य उपादानं व्यर्थाय कल्पते ।

इत्थञ्च साध्यवद्भिन्नपदस्य साक्षात् अवृत्तित्वेन सहैव अन्वयः विवक्षित इति भावः । तथा च लक्षणम् साध्यवद्भिन्नावृत्तित्वमिति । एवञ्च साध्यवद्भिन्नावृतित्वमित्यनेनैव लक्षणेन अव्याप्तिवृत्तिसाध्यकसद्हेतु- स्थलेऽपि समन्वयः सङ्गच्छत एव । कपिसंयोगवत् भिन्नं यत् वृक्षान्तरं तत्र हेतोः एतद्वृक्षत्वस्य अवृत्तित्वात् समन्वयः ।

तथा च साध्याभाववत्पदवैयर्थ्यस्य निवारणाय साध्यवद्भिन्नपदस्य साक्षात् मतुबर्थे वैशिष्ट्यरूप सम्बन्धार्थे अन्वयः विवक्षणीय आपतति । एवञ्च साध्यवद्भिन्नः यः मतुबर्थः सम्बन्धी तदवृत्तित्वम् इति लक्षणार्थः सिद्धो भवति । साध्यवद्भिन्नपदवृत्तित्वमिति । वैशिष्ट्यञ्च तादात्म्येन बोध्यम् । तथा च सति लक्षणस्थं साध्याभावपदं व्यर्थाय कल्पत इति निश्चीयते ।

एतादृश उभयविधवैयर्थ्यपरिहारार्थमेव साध्यवद्भिन्ने यः साध्याभावः तद्वदवृत्तित्वम् इत्याकारकः सप्तमीतत्पुरुषसमासः दीधितिकारोक्तक्रमेण अङ्गीचकार । एवञ्च साध्यवद्भिन्नपदस्य सप्तम्यर्थाधिकरणतायां तस्य च साक्षात् साध्याभावे एव अन्वयात्, तादृश साध्यवद्भिन्नवृत्ति साध्याभावस्य च मतुबर्थे अन्वयात् न उभयविधिवैयर्थ्यशंङ्कावकाशः । एतादृश सप्तमीतत्पुरुषसमासाश्रयणेन साध्यवद्भिन्नपदस्य मतुबर्थे न वा अवृत्तित्वेन साक्षात् अन्वयो सम्भवति ।

सप्तमीतत्पुरुषसमासस्वीकारे तु जगदीशगदाधरयोर्मध्ये नास्ति मतभेदः । उभयत्र च साध्याभाववत्पदसार्थक्याय एव सप्तमीतत्पुरुषस्वीकारो दृश्यते । साध्यवद्भिन्ने यः साध्याभावः तद्वदवृत्तित्वमिति परिष्कारः फलितः ।

**साध्याभाववत्पदवैयर्थ्यशङ्कानिरासः**- साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमित्यत्र साध्याभाववत् पदं न व्यर्थम्, साध्यवद्भिन्नावृत्तित्वमितिलक्षणेनैव **संयोगी द्रव्यत्वादि**त्यादौ साध्यवद्भिन्नत्वेन गुणादेव ग्रहणसम्भवः तेन च तन्निरूपितवृत्तित्वाभावस्य द्रव्यत्यादौ सत्वेनाऽव्याप्तिवारणसम्भवादिति वाच्यम् ।

तत्पुरुषसमास घटितेऽस्मिन् लक्षणे साध्यवद्भिन्नावृत्तित्वस्याघटकतया साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति लक्षणस्य वैयर्थ्यासम्भवात् । एतत् लक्षणाघटकमपि साध्यवद्भिन्नावृत्तित्वमिति व्याप्तिलक्षणं यद्यव्याप्त्यादिदोषग्रस्तं नास्ति तर्हीदमेव लक्षणमस्तु किमनेन साध्याभाववत्पदघटितेन लक्षणेनेति तु रिक्तं वचः, लक्षणान्तरस्य तस्यापि स्वीकारे बाधकाभावात् । अन्येनान्यस्यान्यथाकर्तुमशक्तं चेल्लक्षणद्वयं व्यावृतं पृथक् पृथगस्तु व्याप्तिलक्षणं तावता न कापि क्षतिः सम्भवति । अत एवेदं द्वितीयं लक्षणं स्वीकृत्यापि पञ्चमं लक्षणं साध्यवद्भिन्नावृत्तित्वमित्येवमस्य द्वितीयलक्षणस्याघटकं पृथग्व्याप्तिलक्षणरूपेण स्वीकृतमस्त्येवेति ध्येयम् ।

**साध्याभावपदसार्थक्यविचारः-** अथ च साध्यवद्भिन्ने वृत्ति यः तदधिकरणनिरूपितवृत्तित्वाभाव एव व्याप्तिलक्षणमस्तु साध्याभावपदप्रवेशेन किमिति तु नानुयोज्यम्, **पर्वतो वह्निमान् धूमात्** इत्यादि सद्हेतुकस्थले एव **असम्भवः** । साध्यः वह्निः साध्यवान् पर्वतमहानसादिः तद्भिन्नः ह्रदादिः तद्वृतिः यः अभावः गगनाभावः तद्वान् पर्वतोऽपि, गगनाभावस्य केवलान्वयित्वात्, तद्वृत्तित्वस्यैव धूमे सत्वात् असम्भवदोषः ।

तर्कालङ्कारोऽपि साध्याभावपदानुपादाने गदाधरं अनुव्रजति तद्यथा - साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति- पर्वतादौ धूमादेः सत्वादव्याप्तरसम्भवो वा स्यादतः साध्याभावे'ति पदमुपात्तम् ।

अथ च अभावे साध्यविशिष्टत्वविशेषणे दत्ते च नासम्भवः । तथा च साध्यवद्भिन्ननिरूपितवृत्तित्वाश्रयः यः साध्याभावः तद्वदवृत्तित्वमिति फलति । साध्यः वह्निः साध्यवान् वह्निमान् पर्वतमहानसादिः तद्भिन्नः ह्रदः तद्वृत्ति यः अभावः इत्युक्ते साध्याभाव एव - साध्यनिष्ठप्रतियोगीताकाभावः वह्न्यभावः एव न तु ह्रदवृत्यभावः गगनाभावः । साध्याभावाधिकरणं वह्न्यभावाधिकरणं ह्रद एव तद्वृत्तित्वं मीनशैवालादौ अवृत्तित्वं धूमे'ति समन्वयः।

**साध्यपदप्रवेशप्रयोजनम्** - अथ च साध्यवद्भिन्नवृत्तिर्योऽभावः - तद्वदवृत्तित्वमित्येव व्याप्तिलक्षणम्, अभावे साध्यस्य विशेषणविधया प्रवेशेन किं प्रयोजमिति तु गगनरोमन्थायितम् । साध्यवद्भिन्ने विद्यमानस्य द्रव्यत्यादेः द्रव्यत्वाभावरूपतया पुनरपि ग्रहणेनासम्भवदोषस्य तादवस्थ्यात् ।

ननु अधिकरणभेदेनाभावभेदमतमवलम्ब्यैव एतल्लक्षणं प्रवृत्तिमिति वक्तव्यम् । अन्यथा कपिसंयोगी एतद्वृक्षत्वात् इत्यत्राव्याप्तिस्तथैवावतिष्ठेत । तथा हि कपिसंयोगवद्भिन्नो गुणः तद्वत्तिर्यः कपिसंयोगाभावः तद्वान् वृक्षोऽपि भवति, तदवृत्तित्वं हेतोर्नास्तीति । अधिकरणभेदेनाभावभेदे च गुणवृत्तिः कपिसंयोगाभावः वृक्षवृत्तिः कपिसंयोगाभावस्य भिन्नामिति गुणवृत्तितादृशाभाववान् वृक्षो न भवति, अपि तु गुण एव तदवृत्तित्वं वृक्षत्वे वर्तत इति नाव्याप्तिः । सति चैतदर्थमधिकरणभेदेनाभावभेदस्यावश्यकत्वे पर्वतो वह्निमान् धूमादित्यादौ गगनाभावमादाय पूर्वोक्तदोषो न प्रसजति । साध्यवद्भिन्ने ह्रद वर्तमानस्य गगनाभावस्य पर्वते असत्वात् । एवं सति अभावे साध्यविशिष्टत्वविशेषणं व्यर्थाय कल्पते । परन्तु एतल्लक्षणकरणाय एव अवतरणम् ।

यस्याभावस्याधिकरणभेदेन भेदानङ्गीकारे विरुद्धधर्मद्वयसमावेशः प्रसजेत् स एवाभावोऽधिकरणभेदेन भिद्यते यथा कपिसंयोगाभावः । स हि द्रव्ये अव्याप्यवृत्तिः गुणे च व्याप्यवृत्तिः । तथा च द्रव्यगुणयोः वर्तमानस्य कपिसंयोगाभावस्यैकत्वे एकस्मिन्नैव कपिसंयोगाभावे व्याप्यवृत्तिमव्याप्यवृत्तित्वं चेति विरुद्धं धर्मद्वयं समाविशेत् । न चैतयुक्तम् । अतः साध्यवद्भिन्नगुणवृत्ति कपिसंयोगाभाववान् वृक्षो न भवतीति न कपिसंयोगी एतद्वृक्षत्वमित्यादौ अव्याप्तिः । गगनाभावस्तु ह्रदे पर्वते वा सर्वत्र व्याप्यवृत्तिं न व्याप्यवृत्तिः ।

अतो विरुद्धधर्मद्वयसमावेशप्रसक्त्यभावात् साध्यवद्भिन्न ह्रदवृत्तेर्गगनाभावस्य पर्वतवृत्तगगनाभावस्य च भेदाभावान् तादृशगगनाभाववान् पर्वतोऽपि भवतीति तदवृत्तित्वस्यधूमेऽभावान् पर्वतो वह्निमान् धूमात् इत्यादावसंभवस्यादिति तद्वारणाय साध्यपदमावश्यकमितिभावः ।

**साध्यतावच्छेदकधर्मसम्बन्धावच्छिन्नत्वे जगदीशगदाधरयोः साम्यता विशमता च ।**

- **साध्यतावच्छेकसम्बन्धः- येन सम्बन्धेन साध्यः स्वाधिकरणे वर्तते स सम्बन्धः साध्यतावच्छेदकसम्बन्धः ।**
- **साध्यतावच्छेकधर्मः- साध्ये यद् विशेषणं तत् साध्यावच्छेकधर्मः ।**

साध्यवद्भिन्ननिरूपितवृत्तित्वाश्रयः यः साध्यनिष्ठप्रतियोगिताकाभावः तद्वदवृत्तित्वमित्येव लक्षणकरणे वह्निमान् धूमाात् इत्यत्राव्याप्तिः दुष्त्यजा । तथाहि साध्यः वह्निः साध्यवान् वह्निमान् पर्वतमहानसादिः तद्भिन्नः ह्रदः तत्र वर्तमानः यः साध्यनिष्ठप्रतियोगिताक अभावः महानसीयवह्न्यभावः तदधिकरणं पर्वतः तत्र हेतोः धूमस्य वृत्तित्वात् अव्याप्तिः ।

साध्यतावच्छेकधर्मसम्बन्धस्वीकारे तु नास्ति मतभेदः अनयोर्मध्ये परन्तु गदाधरेण प्रसिद्धानुमानातिरिक्तानुमानेऽपि अव्याप्तिमाशङ्क्य परिष्कारोऽपि प्रादर्शयत्।

- **जागदीशी-**

  **[3]वस्तुतः स्वप्रतियोगितावत्छेदसम्बन्धेन साध्यवद्भिन्ने वर्तते यः साध्यतावच्छेकसम्बन्धेन साध्यीयोऽभावः तद्वद्वृत्तित्वमर्थः । तथा च साध्यतावच्छेकसम्बन्धेन साध्यीयत्वार्थकस्य साध्यपदस्याऽनुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसम्बन्धेन वह्न्यादिमतोऽन्यस्मिन् प्रर्वतादौ यः समवायाद्यविच्छिन्नवह्न्यभावस्तद्वत्ति धूमादेः सत्वादव्याप्तिः स्यादतस्तदुपपात्तमिति न्यायः ।**

- **गादाधरी-**

  **[४] साघ्याभावः साध्यतावच्छेकावच्छिन्नप्रतियोगिताको बोध्यः । अन्यथा वह्निमान् धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावस्य धूमवति सत्वेन पृथिवीत्वाभावद्रव्यत्वान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठद्रव्यत्वाद्यात्मकसाध्यप्रतियोगिकाभावस्य जलादौ सत्वेन चाव्याप्त्यापत्तेः ।**

  साध्यनिष्ठप्रतियोगितायां सम्बन्धावच्छिन्नत्वधर्मावच्छिन्नत्वोभयविशेषत्वनिवेशेऽपि साध्याभाववत्तायां स्वरूपसम्बन्धावच्छिन्नत्वास्वीकारे **'वह्निमान् धूमात्'** इति प्रसिद्धस्थलेष्वेव अव्याप्तिः दुष्परिहरा। तन्निरासाय स्वरूपासम्बन्धावच्छिन्नत्वमुपात्तम्।

  तथापि **'आत्मा कालिकसम्बन्धावच्छिन्नप्रतियोगिताक आकाशाभावाभाववान् आत्मत्वात् '** इत्यत्रापि अव्याप्तिः स्थिरैव।

  पुनः **'साध्यवत्ताग्रहविरोधितानियामकसम्बन्धमादाय'** दोषः परिहृतः ।

  **साध्यवत्ताग्रहविरोधितानियामकतासम्बन्धः**

साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताबुद्धिं प्रति यादृशसम्बन्धेन साध्याभावप्रकारकनिश्चयः प्रतिबन्धकः तादृशसम्बन्धः साध्यवत्ताग्रहविरोधितानियामकसम्बन्धः इत्युच्यते।

पर्वतो वह्निमान् धूमात् इत्यत्र साध्यवत्ताग्रहविरोधितानियामकसम्बन्धः स्वरूपसम्बन्धो भवति।

पर्वतः संयोगेन वह्निमान् इति बुद्धिः प्रतिबध्यते।

पर्वतः स्वरूपेन वह्न्यभाववान् इति निश्चयः प्रतिबन्धकः।




ः प्रकारः, प्रकारता वह्निनिष्ठा। सा च साध्यतावच्छेदकीभूतसंयोसम्बन्धावच्छिन्ना।

संयोगसम्बन्धेन वह्नेः प्रकारत्वात्। प्रकारताविशेष्यतयोश्च निरूप्यनिरूपकभावः।

तथा च पर्वतः संयोगेन वह्निमान् - इति बुद्धिनिष्ठप्रतिबध्यतासंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नाप्रकारता निरूपित पर्वतत्वावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्ना भवति।

---

[3] पञ्चलक्षणी(गादाधरी)

[4] पञ्चलक्षणी(गादाधरी)

पर्वतः स्वरूपसम्बन्धेन वह्न्यभाववान् इति निश्चयः प्रतिबन्धकः ।




तथा पर्वतः विशेष्यः, विशेष्यता पर्वतनिष्ठा । वह्न्यभावः प्रकारः, प्रकारता वह्न्यभावनिष्ठा, सा च स्वरूपसम्बन्धावच्छिन्ना । प्रकारताविशेष्यतयोश्च निरूप्यनिरूपकभावः । तथा च स्वरूपसम्बन्धावच्छिन्नवह्न्यभावनिष्ठप्रकारतानिरूपितपर्वतनिष्ठविशेष्यताशालिनिश्चयत्वं प्रतिबन्धकतावच्छेदकम् । तत्कोटि प्रविष्टत्वात् वह्न्यभावनिष्ठप्रकारतापि प्रतिबन्धकतावच्छेदिका भवति । प्रकारतावच्छेदकसम्बन्धः स्वरूपसम्बन्धः ।

तथा च लक्षणम् – साध्यतावच्छेदकसम्बन्धावच्छिन्न साध्यनिष्ठप्रतारताक बुद्धिनिष्ठप्रतिबद्ध्यता निरूपिता साध्याभावप्रकारकनिश्चयनिष्ठप्रतिबन्धकताघटकसम्बन्धः साध्यवत्ताग्रहविरोधितानियामकसम्बन्धः ।

एवञ्च प्रकृते संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्न वह्निनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपकबुद्धित्वावच्छिन्ना या पर्वत संयोगेन वह्निमानिति बुद्धिनिष्ठा प्रतिबध्यता तन्निरूपिता या पर्वतः स्वरूपसम्बन्धेन वह्न्यभाववान् इति निश्चयनिष्ठा प्रतिबन्धकता तदवच्छेदकीभूता या वह्न्यभावनिष्ठप्रकारता तदवच्छेदकसम्बन्धः स्वरूपसम्बन्धः इति साध्यवत्ताग्रहविरोधितानियामकसम्बन्धो भवति । तेन सम्बन्धेन वह्न्यभाववांश्च न पर्वतः अपि तु ह्रद एव, तदवृत्तित्वं धूमेऽस्तीति लक्षणसमन्वयः ।

- **परिष्कृतं लक्षणम्**–

साध्यवद्भिन्ननिरूपितवृत्तित्वाश्रयः यः साध्यतावच्छेदकावच्छिन्न–

साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठप्रकारताकबुद्धिनिष्ठप्रतिबध्यतानिरूपितासाध्याभावप्रकारक

निश्चयनिष्ठप्रतिबन्धकताघटकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावदवृत्तित्वम् ।

तथा **कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वाद**ित्यत्र नाव्याप्तिः ।

तथा च प्रकृते साध्यः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाशाभावाभावः तद्वान् आत्मा तद्भिन्नो कालः तत्र वर्तमानः यः प्रतियोगिताकाभावः आकाशाभावाभावाभावः स च आकाशाभावस्वरूप एव, तस्याधिकरणं काल एव न तु आत्मा तद्वृत्तित्वं कालत्वे अवृत्तित्वम् आत्मत्वेति लक्षणसमन्वयः ।

**साध्यादिभेदेन व्याप्तिर्भेदात् ।**

**द्वितीयलक्षणस्य सारगर्भितः अंशः गदाधरेण दर्शितः साध्यादिभेदेनव्याप्तिर्भेदात् इति ।**

अनुमित्यौपयिकं व्याप्तिशरीरमस्ति । साध्यवद्भिन्ने यः साध्याभावः तन्निष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तित्वाभाव एव व्याप्तिः । तत्र च साध्याभावाधिकरणम् इत्यत्र अधिकरणस्य एकः सम्बन्धः निविष्टः । साध्यवत्ताग्रहविरोधितानियामकसम्बन्धमादाय साध्याभावाधिकरणम् इति केचित् , साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धमादाय साध्याभावाधिकरणं इत्यपरे । इति पक्षद्वयमत्रोपस्थितम् । स च सम्बन्धः साध्यभेदात् भिद्यते कुत्रचित् स्वरूपं, कुत्रचित् कालिकं इति ।

'**वह्निमान् धूमात्**' इत्यत्र वह्न्यभावः पर्वते स्वरूपसम्बन्धेन वर्तत इति धिया स्वरूपसम्बन्धेन साध्याभावाधिकरणं विप्रक्षितम् । परमत्र किं वह्न्यभावः स्वरूपसम्बन्धेन निविष्टः उताहो साध्यवत्ताग्रहविरोधितानियामक सम्बन्धेन ?

घटभिन्नं पटत्वादित्यत्रापि साध्याभावः घटत्वं समवायसम्बन्धेन विद्यते । साध्याभावः समवायसम्बन्धत्वेनरूपेण निविष्टः उत साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन ? समवायस्य साध्यवत्ताग्रहविरोधितानियामकत्वेन रूपेण सम्बन्धत्वम् अप्रामाणिकम् । समवायत्वेन रूपेण विशिष्यत्वेनैव रूपेण निवेशः कर्तव्यः ।

'वह्मिमान् धूमात्' इत्यत्रापि स्वरूपसम्बन्धत्वेन विशिष्यत्वेनरूपेणैव निवेशः कर्तव्यः । न तु साध्यवत्ताग्रहविरोधितानियामकं सम्बन्धत्वेनरूपेण ।

**साध्यादिभेदेन व्याप्तिभेदात्** इत्यनेन न्यायेन वह्निमान् धूमात् इत्यत्र व्याप्तिलक्षणमित्थम् - वह्निमद्भिन्ने यः वह्न्यभावः तदवदवृत्तित्वम् । '**घटभिन्नं पटत्वात्**' इत्यत्र घटभेदवद्भिन्ने यः घटभेदाभावः तद्वदवृत्तित्वम् । अतः व्याप्तिभेदात् सम्बन्धभेदोऽपि भिद्यते इत्यर्थः ।

अतः तत्तत्साध्यकस्थले तत्तत्साध्याभाववति दैशिकविशेषणतासमवायादिसंसर्गाणामेव विशिष्याभावसम्बन्धतया निवेशः कर्तव्यः । वह्निसाध्यकस्थले लक्षणघटकसम्बन्धः स्वरूपः, अतः तेनैवरूपेण साध्याभावाधिकरणं वक्तव्यम् । साध्यवत्ताग्रहविरोधितानियामकादि सम्बन्धः परिचयाय एव प्रदर्शितः इति विशेषः ।

तथा च येन सम्बन्धेन साध्यवति साध्यवद्भिन्नवृत्तिसाध्याभावो न वर्तते तेन सम्बन्धेन साध्याभावत्वं निवेश्यम् । '**वह्निमान् धूमात्**' इत्यादौ साध्यवद्भिन्नह्रदादिवृत्ति वह्न्यभावः पर्वते स्वरूपसम्बन्धेन न वर्तत इति तेन सम्बन्धेन साध्याभाववान् ह्रदादिः तदवृत्तितत्वं धूमेऽस्तीति लक्षणे समन्वयः । इत्यलम् वाग्व्यापारेण ।

**गदाधरोक्तदिशा –**

**घटत्वाकाशसंयोगान्यतराभाववानाकाशत्वात् इत्यत्र अव्याप्तिः तन्निरासश्च ।**

**आकाशः घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशत्वात्** इत्यत्र साध्यवद्भिन्ने यः साध्याभावः तद्वदवृत्तित्वम् इत्याकारक द्वितीयलक्षणस्याव्याप्ति उपपाद्यते ।

- **अव्याप्तिः**

साध्यं घटत्वघटाकाशसंयोगान्यतराभावः साध्यवान् घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशः तद्भिन्नः घटः, तत्र वर्तमानः यः साध्याभावः घटत्वघटाकाशसंयोगान्यतराभावाभावः स च घटत्वघटाकाशसंयोगान्यतररूपः ।

घटे घटाकाशसंयोगस्य अव्याप्यवृत्तितया अभाव सत्वेऽपि घटत्वस्य व्याप्यवृत्तितया अभावसत्वात् घटत्वघटाकाशसंयोगयोरन्यतरस्य घटत्वस्य तत्र सत्वेन अन्यतराभावस्यासत्वात् । घटे विद्यमानः अभावः घटत्वरूपो घटाकाशसंयोगरूपश्च । तत्र घटाकाशसंयोगस्याधिकरणे आकाशे आकाशत्वहेतोः वृत्तित्वात् अव्याप्तिः स्थिरैव । तथा च साध्याभावनिष्ठाधेयतानिरूपिताधिकरणतायां निरवच्छिन्नत्वं निवेशनीयम् । तथा च लक्षणम्– साध्यवद्भिन्ने यः साध्याभावः तन्निष्ठाधेयतानिरूपितनिरवच्छिन्नाधिकरणतावदवृत्तित्वाभावः ।

साध्यवद्भिन्ने घटे वर्तमानः यः साध्याभावः घटाकाशसंयोगाभावः न स्वीकर्तुं शक्यते । निरवच्छिन्नायाः घटाकाशसंयोगनिरूपितायाः अधिकरणतायामप्रसिद्धया न साध्याभावपदेन स्वीकार्यः । अपि तु घटत्वमेव साध्याभाव पदेन ग्राह्यम् । तथा च साध्याभावनिरूपितनिरवच्छिन्नाधिकरणतावान् घटः, तदवृत्तित्वमेव आकाशत्वेऽपि नाव्याप्तिः ।

- **समन्वयः** -

तथा हि – साध्यः घटत्वघटाकाशसंयोगान्यतराभावः, हेतुः आकाशत्वम् । यत्र यत्र आकाशत्वं आकाशे तत्र घटत्वमपि नास्ति घटानधिकरणावच्छिन्नप्रदेशे घटाकाशसंयोगोऽपि नास्ति इति घटत्वघटाकाशसंयोगोभयभावसत्वेनान्यतराभाव सत्वादयं सद्हेतुः । यत्रोभये नास्ति तत्रैवान्यतराभावः, यत्रैकं वर्तते तत्र नान्यतराभाव इति ध्येयम् ।

साध्यं घटत्वघटाकाशसंयोगान्यतराभावः साध्यवान् घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशः तद्भिन्नः घटः तत्र वर्तमानः यः साध्याभावः घटत्वघटाकाशसंयोगान्यतराभावाभावः स च घटत्वघटाकाशसंयोगान्यतररूपः । घटे घटत्वस्य घटाकाशसंयोगस्य सत्वात् । तद्वृत्तित्वम् घटत्वे अवृत्तित्वं आकाशत्वेति लक्षणसमन्वयः ।

- **जगदीशोक्तदिशा**

अथ च भावरूपाऽभावस्याधिकरणभेदेन भेदो मास्तु तथा च साध्यपदप्रदेशस्य सार्थक्यम् – परं व्याप्तिस्तु दुर्वारैव ।

**'घटत्वघटाकाशसंयोगान्यतरत्वाद्यवच्छिन्नाभाववान् गगनत्वात्'** इत्यत्र अव्याप्तिरुक्ता ।

साध्यः घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभावः तद्वान् घटः तत्र वर्तमानः अभावः गगनघटसंयोगः, तदधिकरणे गगने गगनत्वहेतोः वर्तमानत्वात् अव्याप्तिः व्याप्या ।

तन्निरासनाय अधिकरणभेदेन अभावो भिद्यते इति स्वीकारः कर्तव्यः तथा च नाव्याप्तिः ।

अभावस्य अधिकरणभेदात् भेदः वक्तव्ये सति अव्याप्तिः वार्यते । तथा च साध्यवद्भिन्ने वर्तमानः यः घटत्वघटाकाशसंयोगाभावाभावः स च घटत्वरूपः घटगगनाभावस्वरूपश्च । घटत्वं घटे व्याप्यवृत्तितया वर्तते । घटगगनाभावः अव्याप्यवृत्तितया वर्तते । तयोः सर्वथा भेदात्, घटत्वाधिकरणे घटे गगनत्वस्य अवृत्तित्वात् अव्याप्तिः वार्यते ।

**निगमनम् - अधिकरणभेदेन अभावो भिद्यते** इति न्यायमादृत्यैव द्वितीयलक्षणमारब्धम् । गदाधरेण जागदीशतर्कालङ्कारापेक्षया स्वभिन्नविचाराः बहु उक्ताः । परं अन्ते अव्याप्तिस्तु उभयत्रापि समाना एव ।

साध्यवद्भिन्नवृत्तिः यः साध्याभावः तद्वदवृत्तित्वम् इति लक्षणम् । तत्र साध्यवद्भिन्नपदे सप्तमीतत्पुरुषस्यैव स्वीकारः जगदीशेन गदाधरेण च कृतमस्ति । साध्यपदस्य साध्याभावपदस्य च वैयर्थ्यनिरासोऽपि कृतः ।

ततः साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकधर्मसम्बन्धावच्छिन्नत्वादि विशेषणमाध्यमेन **''वह्निमान् धूमात्''** कालिकेन द्रव्यत्वाभाववान् कालत्वाद् इत्यत्र अव्याप्तेः परिहारः कृतः गदाधरेण । जगदीशेन च साक्षात् साध्यीयत्वेनेव साध्याभावस्य च प्रवेशात् बहुश्रमः विचारश्च न कृतः ।

गदाधरभट्टाचार्येण साध्याभाववत्तायां विशेषणद्वयमाध्यमेन स्वबुद्धिप्रतिभायाः दर्शनमकारि । **'घटत्वाभाववान् पटत्वात्'** इत्यादिस्थलेषु अव्याप्तिनिरासाय **'साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन'** साध्याभावाधिकरणस्वीकारात् कथमव्याप्तेः निरासः इत्युपपादितमस्ति ।

पुनश्च **साध्यात्माकाभावनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन** साध्याभावाधिकरणेनापि अव्याप्तिः वार्यते इत्यादि केचित्काराणां पक्षोऽपि उपस्थापितम्। तत्र यावत् साध्यनिरूपितत्वं यत्किञ्चित् साध्यनिरूपितत्वादिकमपि स्पष्टतया निरूपितम् ।

एतत् सर्वं बहुविचारानन्तरमपि अनुमित्यौपधिकशरीरे न अभाव सम्बन्धः निवेशसम्बन्धः, साध्यादिभेदो व्याप्तेर्भेदात् । अतः साध्यीयत्वेनैव साध्याभावस्य प्रवेशः कर्तव्यमापतति । मतमिदं जगदीशेन पूर्वमेव स्वीकृतम् । एतावन्मतः विचाराः जागदीश्यां न सन्ति ।

उभयत्र स्वप्रतियोगिसामानाधिकरण्य स्वप्रतियोगिवैयधिकरण्यरूप विरुद्धधर्माध्यासाभावः अधिकरणभेदो अभावस्य भेदः स्वीकार्यः एव ।

गादाधर्यां तावत् **'घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशत्वात्'** इत्यत्र अव्याप्तेः निरासः निरवच्छिन्नत्वविशेषणेन कृतः । परं तदपि न युक्तम् । पक्षान्तरे स्थलद्वये पुनः अव्याप्तिः उपस्थापितम् ।

जगदीशेन च **'आकाशत्वात्'** इत्यस्य स्थाने **'गगनत्वमिति'** शब्दान्तरं कृतम् । उभयत्र विचारा**:** समान एव ।

इत्थञ्च **'अधिकरणभेदेन अभाव भेदाङ्गीकृतमते' 'कपिसंयोगी एतद्वृक्षत्वात्'** अव्याप्यवृत्तिसाध्यक स्थलादिषु नाव्याप्ते अवकाश इति अलम् ।

**सहायकग्रन्था:**


| **क्रम:** | **ग्रन्थनाम** | **विवरणम्** | **प्रकाशनम्** |
|---|---|---|---|
| १ | न्यायकोश: | सकलशास्त्रोपकारक न्यायादिशास्त्रीयपदार्थ-प्रकाश: महामहोपाध्याय भीमाचार्येण विरचित: | चौखम्बा सुरभारती प्रकाशनम् - वाराणसी |
| २ | न्यायभाष्यम् | गौतमप्रणीतन्यायसूत्राणां वात्स्यायनमुनिप्रणितशास्त्रम् प्रसन्नटीकासहित संपा. हरिदास शास्त्री | चौखम्बा सुरभारती प्रकाशनम् - वाराणसी |
| ३ | गादाधरी | द्वितीयोभाग अनुमानखण्डम् | चौखम्बा संस्कृत प्रकाशनमम्- वाराणसी |
| ४ | न्यायमञ्जरी | जयन्तभट्ट: गौतमसूत्रतात्पर्यविवृत्ति: | काशीसंस्कृत प्रकाशनमाला |
| ५ | न्यायसिद्धान्तमुक्तावली | किरणावलीव्याख्यासमेता प. कृष्णवल्लभाचार्य: | चौखम्बा संस्कृत संस्थान - वाराणसी |
| ६ | पञ्चलक्षणीसर्वस्वम् | कुरुगण्टिरामशास्त्रि प्रणीतम् संपा. सुदर्शन शर्मा | वेङ्कटेश्वरवेदविश्वविद्यालय तिरूपति |
| ७ | तर्कभाषाव्याख्यासारमञ्जरी | माधवदेवकृता संपा. टी.डी.मुरलीधर: | राष्ट्रीयसंस्कृतसंस्थानम् - नवदेहली |
| ८ | पञ्चलक्षणी सिंहव्याघ्रलक्षणे च | रघुनाथशिरोमणिकृता दीधिति, गदाधरकृता गादाधरी, रामानुजताताचार्य कृता बालबोधिनी व्याख्या | राष्ट्रीयसंस्कृततसंस्थानम् – नवदेहली |
| ९ | प्रशस्तपादभाष्यम् | श्रीधरभट्टप्रणीत न्यायकन्दली व्याख्या संपा. दुर्गाधर झा | सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: वाराणसी |
| १० | व्याप्तिपञ्चकम् | माथुरीजागदीशिसमलङ्कृता | मास्टरखेलाडीलालसंकटाप्रसाद वाराणसी |
| ११ | व्याप्तिसप्तकसार: | डॉ. पीयूषकान्तदीक्षित | नागप्रकाशन – देहली |
| १२ | दर्शनशास्त्रस्येतिहास: | डा.शशिबालागौड: | चौखम्बा सुरभारती प्रकाशन- वाराणसी |